केशवीयदर्शपूर्णमासारंभः

७२५



॥श्रीगणेशायनमः॥श्रियःपतिंनमस्कृत्यकण्वंचमुनिसत्तमं॥प्रयोग
सारंवक्ष्यामिकेशवोहृदयथास्मृति॥नारायणादिभिःप्रयोगकारै
रेकंपक्षमाश्रित्यदर्शपूर्णमासादीनांप्रयोगउक्तः॥आचार्यपा
रैर्द्वैधपक्षांतराण्युक्तानि।भवस्वामिमतानुसारिणामयंतु उ
भयमप्यंगीकृत्यप्रयोगसारःक्रियते।आमावास्येनेत्यादि।प्रथम
नएवामावास्यग्रहणंमंत्रक्रमात्॥हविषोतिसान्नानिर्देशादेकवच
नं।पुरस्ताद्ग्रहणंकर्मारंभात्पूर्वकालेआतंचनद्रव्यंयेथादितरथास्या
आरब्धकर्मणिद्रव्यालाभेदोषःस्यात्।एतेनेक्षापितत्रातदन्य

त्रआधानादिषुपुरस्ताद्ग्रहणंनकरोति।एवशब्दश्चन्यायादेवपूर्वकालत्वे
सिद्धेयस्यप्रतिबंधेनातंचनद्रव्यंनचसंभवति।तस्यतस्मिन्नपिकाले
द्रव्यग्रहणेनदोषःस्यादितिख्यापनार्थं।एकाहेनद्व्यहेनात्रयहेनच
प्रेएकाहेनहेमंतेद्व्यहेन।एकोवाशब्दोविकल्पार्थः।द्वितीयेनवाशब्दे
नअयमपिनियमोनास्ति।यथासंभवंआसन्नकालेद्व्युपकल्पनं
कर्तव्यंस्वेष्टसिद्ध्यर्थत्वात्।आतंचनस्योतिख्यापयति।चंद्रमसंवानिर्दो
येतियदासंपूर्णोभवेदितिज्ञात्वा।अनिर्दायेतिनास्त्यद्यचंद्रमाइति
ज्ञात्वावासंपूर्णंवाविज्ञायेयदासंपूर्णोभवेदितिज्ञात्वात्वाअग्नीन
न्वादधाति।प्रातरग्निहोत्रंहुत्वाऽद्वरणपक्षेआग्नेद्वयंअपास्या

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

२ यतनेऽग्नये नोपलिप्य यजमानो यदि केशश्मश्रु वापयिष्यमाणः स्या
त्केशश्मश्रूणि वापयित्वा त्रीणि सहस्यनूवानि कृत्वा यदि वास्मा
तः शुचिवासा नवनीतेनाभ्यंजितः अंजनेनांजितः पवनादि कुर्या
दृतेषां क्रमः एकविंशतिपिंजूलानि त्रेधा विभज्य सप्तभिः मा
दक्षिणं सप्तभिर्नाभिदेशं सप्तभिर्गुह्यदेशं पाययित्वा तानि सर्वा
णि समुच्छ्रित्याङ्गिरोभ्युक्ष्योदङ्मुखः स्यात् ततो मंत्रावमने करोति।
आपोहिष्ठामयोभुव इति प्रथमं विवेत्। योवः शिवतम इति द्वितीयं
तस्मा अरंगमाम व इति तृतीयं। व्याहृतिभिः परिमृजेत्। व्याहृतिभिः विवेदङ्गानि
भिः परिमृजेद्वा। शेषं यथानिहितं समाप्य अ २

ङ्गिः प्रोक्षणं करोति। सुरभिमत्यादयोऽङ्गानि। आपोहिष्ठामयोभुव इत्यादयः। नाडीभिः। यश्छिद्र इत्यादयः हिरण्यनिर्णिग्भिः हिरण्यवर्णाः शुचयइत्यादयः। पावमानीभिः पवमानः सुवर्जनइत्यादयः। पत्न्यादिवपनाभ्यंजनांजनवर्ज्यं सर्वं करोति। अ
ध्वर्युरेवतस्याः प्रोक्षिता अध्वर्युरपि स्नानादि करोति। ततः पत्नीयजमा
नौ तीर्थेन प्रापाद्य गार्हपत्यस्य पश्चात्प्राग्ग्रेषु दर्भेषु प्राङ्मुखावु
२वि पवेशतः उत्तरतः पतिर्दक्षिणतः पत्नी ततः प्राणानायम्य देशकाली
स्मृत्वा आमावास्येनहविषा यक्ष्य इति त्रिरुच्चैश्चोक्त्वा इडादेवहू

रितिज्ञापितोदेवागातुविदइतिच। अग्निहृदयंविहृत्ययजमानेनदेवतासंके
त्येकृतेयजमानोवाध्वर्युर्वाग्नीनन्वादधाति। अग्न्यन्वाधानंयजमानंया
जमानेसमाम्नानादितिकेचित्। याजमानपरस्मैपदात्। अध्वर्युरादधा
तीतिशातंतरदर्शनात्। वेदिंविमायाग्नीनन्वादधातीतिवेदिविमानादि
समानकर्तृकत्ववचनमाचार्यस्योभयलिंगदर्शनात्। यजमानोवाध्वर्यु
र्वेतिविकल्पोभिप्रेतइतिमन्यंते। गार्हपत्यस्यपश्चादुपस्थंकृत्वामसा
म्नेवर्हइत्यादिभिस्तिसृभिर्ऋग्भिर्गार्हपत्येयथासंख्यंत्रीणिकाष्ठान्य
न्वादधाति। अन्वाहार्यपचनस्यपश्चादूर्ध्वजानुरुपविश्यमध्यंयजं
त्यादिभिस्तिसृभिस्त्रीणिकाष्ठान्यप्योदधाति। आवेहनीयस्यो

नरपश्चिमदेशेप्रङ्मुखस्तिष्ठन्धातादधातुणामित्यादिभिस्तिसृभिस्त्रीणिका
न्यभ्यादधाति। उत्तरेणाहवनीयंतिष्ठन्नवोचमितिदशमीनिगदेत्। अ
पिवाव्याहृतिभिरेवाग्नीनन्वादध्यात्। एकैकमग्नेकैकमंत्रेणनिधायाति
क्रिष्टउत्तरेणाहवनीयंतिष्ठन्निगदेत्। दृशानोत्तरेणाहवनीयंतिष्ठन्
निगदेत्। आहवनीयमेकैकमग्नेवर्हइत्येतयाविधायातिक्रिष्टउत्त
रेणाहवनीयं। तूष्णीमितरौअन्वाधायातिक्रिष्टउत्तरेणाहवनीयंन्नि
गदेत्वा। व्याहृतिरन्वादध्यादितिवा। ततोग्नीन्परिसमूह्यसंमार्गंकृत्वा
।एतस्मिन्कालेपत्नीयजमानोगंधादिभिरलंकुर्वाते। एतस्मिन्कालेय
जमानउत्तरेणाहवनीयेकरेणयाधाग्नेणाहनीयंपरीत्याहवनीयस्य
दक्षिणपश्चिमदेशेयजमानोयतनंतस्मिन्नुपविश्यहोत्रीयप्रदेश

मा त्रोदक्षिणहस्तेनिधायपयस्वतीरोषधयइतिमंत्रेणसक्त्वित्वेत्। घृतस्रुचि
घिबेत्। आहवनीयंपरिषिच्यसमिधआदधाति। अग्नेव्रतपतइत्यादिभिश्च
तुर्भिर्मंत्रैश्चतस्रःसमिधोजुहुयात्। आहवनीयंपुनःपरिषिंचति। अथास्ये
तिअस्येतिचवेदानिर्देशादतऊर्ध्वमाध्वर्यवमेवैंनंशापयति। व्रतोपेतस्यव्रतो ।४
पानीयंअत्रनिरुक्तिःसंकल्पःतपयस्वतीसमिधोदोनस्येत्यर्थः। एतस्मिन्काले
अध्वर्युरसिदमादायोत्तरयोर्मध्येनोपनिष्क्रम्यपर्णशरवमाच्छेत्तिआ
भिमुख्येनपर्णशरवंगच्छति। प्राचीमुदीचीवादिशंगत्वायत्रवावेत्स्यन्मन्य
तइत्यनेनान्यत्रदक्षिणापश्चिमयोर्नभमानोपिइषत्प्राचीमुदीचीवादि
शंवागत्वायथार्थंगच्छेत्। तत्रगत्वाबर्हुपर्णमसुषिरामशुक्लाग्रांपलाशा ५
खांआच्छिनत्तीमेहोर्जेत्वेति। इषेत्वेतिशारवामाच्छिनत्ति। ऊर्जेत्वेत्यनु ५

मृज्यात्तामीक्षेतवा। शारवयासहागस्त्यगोदंगत्वा। तयाप्रउवरार्ध्यान्वत्सानपाक
रोतिनायस्त्रीपावयेत्स्त्रेति। नायवत्स्त्रेतिपुंसोपाकुर्याद्धायवत्स्त्रेतिस्त्रियोथ
यथान्यतरेस्युःसंस्रष्टेनैववत्सानपाकुर्यात्। ततोमाहःश्रेष्यति। प्रेरणंपथ
कृरणं। देवोवःसविताप्रार्पयत्विति। ध्रुवाअस्मिन्गोपतौतियजमानमीक्षते।
यजमानेधारणंमनसास्मरणं। परोक्षत्वात्। अथैनांशारवामग्रेणाहवनीयंप
र्यूह्यवेधुकरयोर्मध्येनप्रपद्यजघनेनगार्हपत्यमग्नीध्शकटेवाअध्या
गारस्योत्तरार्धेचोवंजुहुति। यजमानस्यपशून्पाहीति। कुर्यादिसन्नयतिस
न्नयतमेनंइत्यर्थः। नशब्दएवमित्यस्मिन्नर्थे। यद्युवैनसन्नयतिबर्हिःप्रति
पदेवभवति। नसंन्नयतिआरंभएवबर्हिर्लवनंकर्तव्यंवत्सापाकरणकाले
। पत्नीयजमानोसर्विर्भिश्चदधिमिश्रंवाक्षारेणोत्तरणंवर्थकाशीधान्यव

र्यमिदमभीयातां॥ ॥इति केशवस्वामिकृते प्रयोगसारे प्रथमोऽध्यायः॥ ॥
स्रुवांनिधायगार्हपत्यस्यपश्चात्तिष्ठन्नासिरमादत्ते। देवस्यत्वेति। आदाया
ग्निमंत्रयते। यज्ञस्यघोषदसीति। अग्निमंत्रणेनाग्नाभिमर्शनमवेक्षणंवा
।गार्हपत्येप्रतितपतिप्रत्यष्टमिति। अथाहवनीयमग्निन्नेत्रेत्रेयमगादिति।
इहबर्हिरितिवेदिमवेक्षते। तांदिशंगत्वाप्रस्तरस्ययावद्दर्भमन्यते तावद्दर्भ
स्तंबंगृह्णातिदेवानांपरिस्तरणमसीति। असिनोनदेर्धमुन्माष्टिवर्दहन्म
सीति। तेनपर्वस्तृणत्तिदेवबर्हिर्मानुषान्वागिति। आच्छेत्तातेमारिषमित्या
च्छिनत्ति। आच्छेदनान्यभिमृशतिदेवबर्हिरातवत्शंथिरोहेति। आच्छेदना
भिमर्शनंसकृत्। आच्छिन्नानामितिकेचित्। अनंतरंसर्वेशाएवैनंस्तंबं
कुनातीतिवचनात्। अन्येसर्वेस्तंबंच्छित्वेति। सहस्रवत्शीर्षेवयंसहे

मित्यात्मानंत्रत्यभिमृशेत्। सर्वत्रांगमुपस्पृश्यसिचन्नापःस्पृशेत्। एवंच्छेदनभे
दनखननिरसनपितृराक्षसनैर्ऋतरौद्राग्निचारिणीयेषुपउपस्पृशेत्।
प्रस्तरकृत्वाग्नेर्योनिंदधातिपृथिव्यासंपृचइति। तस्मिन्नुर्ध्वं। तस्मिन्शब्द
स्यवाग्निंद्रियव्यापारनिवृत्तिविषयत्वान्मंत्रमात्रंनिवर्त्ततेपरिग्राहादिमंत्रा
वर्ज्यंक्रियामात्रंकृत्वातौनौयुजोमुष्टीन्नुनाति। त्रीन्त्सप्तनवेत्यादीन्अ
थत्रिरन्वाहितंशुल्बंकृत्वापसलैरावेष्टयति। अदित्यैरास्नासीति। शुल्बकम्
णेसर्वप्रदक्षिणंवेष्टयित्वासंदंशौपश्चादपसलमंत्रेणवेष्टयति। संधित्रया
र्थमेकंशुल्बंकरोतीत्यर्थः। अन्येमंत्रोनिधानार्थइति। तर्हिसम्यक्तच्छब्देन
व्यवायात्। अदित्यैरास्नासीत्युदीचीनाग्रंनिधायेत्येवंसिध्यति। तदुचीना ग्रं
यंनिधायतस्योपरिअयुजौमुष्टीनिधायतेषामुपरिप्रस्तरंनिदधाति। सु

संभृतोत्येति। प्रथमं प्रस्तरं मंत्रेण संभृत्य तस्योपरि तूष्णीं संभरति वा। शुल्बस्यो
ग्राने की कृत्य इंद्रायेत्यनेन सन्नह नमित्यावेष्टयति। पूषा ते ग्रंथिमिति ग्रंथिं करोति स
तमास्वादितिग्रंथिपश्चात्प्राचमुपगूहति पुरस्तात्प्राचं वा। एतस्मिन्काले
रिभाजनीयार्थं वेदार्थं सकृदाच्छिन्नार्थमुष्टीत्वनीति। एतेषांत्वनन्मात्रमे
वकाशकुशादीनां देशेदूरश्चोदाहृत्य यजुषाकरोति वा। सर्वान्समुच्चित्योध
च्छतइंद्रस्येत्यनाभ्यामुच्छ्रयति। शिरसिकिंचिन्निधायतदुपरिनिदधाति
। इहस्थतेरिति। आगच्छतिउर्वंतरिक्षमिति। आगत्योत्तरेणगार्हपत्यंअंत र्वे
दिस्थंवाशकटंवानिधायतस्मिन्निदधाति। देवंगमम्सीति। ततउद्धृत्य
यत्रगुप्तंभवतितत्रनिदधाति। अंतर्वेदितूष्णींनिधायादाययत्रसुष्टुनिधा
स्यन्स्यात्तत्रमंत्रेणानिदध्याद्वा। अथतथैवत्रिरन्वाहितंशुल्बंकृत्वेतितथे

वेतिसिद्धेत्रिरन्वाहितग्रहणंमंत्रनिवृत्त्यर्थं। अमंत्रेणपूर्ववत्। शुल्बंकृत्वाउदगग्रं
निधायप्रादेशोर्ध्वप्रमाणानांसत्वक्कानांसुषिराणांअकृमिदष्टानांअवक्रिकृत्वि
तानांबाहुमात्रैःपरिधिभिःसहकाष्ठानामेकविंशत्यानिरपेक्षमिष्टदार्वैस
मर्थमिध्मंसन्नह्यति। यत्कृष्णोरूपमिति। त्रायितवन्सजानुसदृशंवोदंकृत्वा
ग्रप्रदेशोपरिष्टात्स्यवेदाग्रंनिदधाति। अमावास्यायांवेदिंकरोतिपौर्णमा
स्यांतुउत्तरपरिग्रहात्पूर्वं। अपराह्णेपिंडपितृयज्ञेनचरतियजमानः॥ ॥
इतिकेशवस्वामिकृतेप्रयोगसारेद्वितीयोध्यायः॥ ॥तृतीयोध्यायोपक्र
मः पिंडपितृयज्ञप्रतिपादनात्॥ अथेतिपिंडपितृयज्ञानंतरंशाखायाःपर्णानि
सर्वाणिप्राक्छित्वागार्हपत्यस्यपुरस्तान्निधायैतांशाखांअधस्तात्परिवा
स्यमूलतःछित्वास्तृत्प्रदेशंगार्हपत्यस्यपश्चादुपनेषार्थंनिदधात्। प्रादे

रामात्रंनीत्वा।आदेशमात्रंमितिनशाखापरिमाणं।शाखायांआदेशमात्रंदर्भ
नाडीःप्रवेशयतीतिसंबंधः।दर्भनाडीभिःसहाधस्तात्बंधनंकृत्वादर्भयुग
ल्याशाखयासहत्रिवृत्तंकरोतित्रिवृत्यत्राशइति।शाखांपवित्रेनिधायसा
यमग्निहोत्रंहुत्वातस्यशेषंसुरक्षितंनिधाय।गार्हपत्यस्योत्तरेदर्भान्संस्त्री
र्यतेषुचतुष्टयंसंसादयति।तान्येवमेवंवंमितिपरिभाषितत्वात्।तत्संस्
संस्कृताभिरद्भिःशुंधध्वमितिसकृन्मंत्रेणाद्भिस्तत्संस्कृतं।कमंडलुगताभिरद्भिः
वा।अथनेनगार्हपत्यमुपविश्योपवेषोद्वौचोंगारान्निरूंधतीमात
रिश्वनइति।तेषंगारेषुसान्नाय्यपत्नीमधिश्रयतिधोरसिपृथिव्यसीति
।तस्यांकुंभ्यांप्रागग्रंशाखांपवित्रंनिदधाति।वस्तांपवित्रमसीति।पवि
त्रमन्वारभ्यवाचंयमआस्ते।अथायतीर्गाः प्रतीक्षते।एताआचरंतीति।

मंत्रेषिंद्रस्थानेमहेंद्रोमहेंद्रयाजिनां।परिक्रमिणांनिरीक्ष्योपस्पृशंमेप्रब्रूता
दित्याह।सपरिक्रमिष्यत्संविमुच्योपस्पृशेतिप्रत्याह।दोह्यमानामनुमंत्रय
तेकृतस्तोकइति।परिक्रमीदोग्धृहस्तादादायोत्तरेणवेद्युत्करोप्रपाद
स्थात्यांपयआनयति।स्थालीपयःप्रापयंतंपृछतिकामधुक्षइति।एतावा
नेवमंत्रः।अमुमितिवचनंनाममात्रंमहेंद्रायेत्येकवचनात्।प्रश्नप्रति
वचनयोश्चसमानत्वात्।अन्योनुभयोर्मंत्रयोःप्रतिगैक्रियामाहुःतदाका
मधुक्षःप्रणोब्रूहीति।अमुमितिगोर्नामगृहीत्वायस्यांदेनामेतिउप
स्पृशंमेप्रब्रूतोदितिप्रतिप्रश्नंप्रतिवचनं।बहुत्वपक्षेएकपक्षोनेत्या
हुः।गवामसंनिधानाद्दुग्धालाभेवत्सापाकरणप्रस्तीनंमंत्रानसा

धवेदियाङ्गरा चार्यपादाः।आसेचनप्रोक्षणीनूमंत्रान्साधयेदितिकेचित्।तामनु
मंत्रयतेसाविश्वायुरितिं।अनुमंत्रणंनामत्रक्षायित्वामंत्रजपः।।द्वितीयादिषु
उपस्तरणमित्यादिसमानं।अनुमंत्रणेविशेषः।साविश्वव्यचाइतिद्वितीयां
साविश्वकर्मेतितृतीयं।तिसृषुदुग्धासुवाचंविसृजते।बर्हुदुग्धीदायेति।
पवित्रंविसृज्योत्तरादोयंहवित्वादोहनेअपआनीयसंक्षालनमानयति
संपृच्यधामितिं।तत्त्वोदगुह्यस्येतिकृत्योदगग्रंपवित्रेनिधायदर्भान्न
क्तिसोमेनत्वातनच्मीति।यावदलंभवतितावदानयति।अग्निहोत्रोच्छेष
णमभ्यातनक्तियज्ञस्यसंततिरासीति।कुंभ्याउपंपवित्रंनिधायोदन्चम्
ताकसेनैवाचमसेनवापिदधाति।अदस्त्वमसीति।तदादायोपरिक्षिप्या
दोगुत्तंनिदधातिविसोहव्यमिति।एतस्मिन्कालेगोसंगलाप्रातर्दोहा

र्थंदर्भैर्बर्हिरास्तरथंकरोति।तस्मी।। ।।इतिकेशवस्वामिकृतेप्रयोगसा
रेचतुर्थोध्यायः।। ।।प्रातराग्निहोत्रंहुत्वानंतरमुत्तरेणाहवनीयंतिष्ठ
न्नुत्तरेणगार्हपत्यंवाहस्तौसंस्पृशतेकर्मणेवामिति।नक्तंपरिस्तरणं।
उपस्तीर्यपूर्वेष्वाग्नेरपरस्त्रेतिश्रुतेः।प्रथमंपरिस्तरणातिपुरस्ताद्उद
गग्रेःदक्षिणतःप्रागग्रेःपश्चाद्उदगग्रेउत्तरतःप्रागग्रेःदक्षिणाउत्तरान
यरान्करोति।एवमन्वाहार्यपचनंएवंगार्हपत्यं।गार्हपत्यंप्रथमंवाए
तस्मिन्कालेएपुस्थानेषुदर्भैरासनानिकल्पयति।दक्षिणेनाहवनीयं
ब्रह्मासनं।तमुपरेणयजमानस्यउत्तरेणाहवनीयंप्रणीतायाःउत्तरस्रो
तिमुत्तरेणाहोतुःउत्करआग्नीध्रस्य।जघनेनगार्हपत्यंप्रतिपत्न्यास्ते
।कालेकालेवादर्भान्परिस्तृणाति।गार्हपत्यस्यपुरस्ताद्उत्तरतोवादर्भान्स्ते

स्तीर्यतेषुप्रक्षात्यपात्राणिदृंहंत्यंचिअधोबिलानिसादयति।स्फ्यादीनि।अ
न्वाहार्यस्थालीचमसदंतीचेत्यंतानि।अन्यानिकर्मोपयोग्यानिसादयेत्।
एतस्मिन्कालेब्रह्मास्नानादिपंचकंविधायअजिनंवास्तृणंवोपनीयोत्तरे
णवेघुत्करोत्रपाद्याग्नेणाहवनीयंपरीत्यब्रह्मायतनस्यदक्षिणतउद
ङ्मुखवस्तिष्ठन्ब्रह्मसदनमुपतिष्ठते।।नमोब्रह्मणेनमोब्रह्मसदनाये
ति।आसनान्तृणंनिरस्यति।अहेदैधिषव्यइति।उपविश्यनिवर्तइति।
द्यावापृथिवीइतिउपविश्यजपति।भूर्भुवःसुवःकरदंब्रह्मेति।द्यावा
पृथिवीसमिक्षेतेमातपोमाएतस्मिंन्काले यजमानोब्रह्माणंवृणीतेभू
र्भुवनपतइति।हतोब्रह्माजपत्यहंभूपति।असौरोदस्थानेआत्म

नोनामप्रथमांतंगृहीत्वामनुष्याणामिति।एवंब्रह्माणमुपवेश्यपृच्छ्यांस्तू
ष्णीति।संततोगार्हपत्यादाहवनीयात्।दर्भान्वस्तृणाति।यज्ञस्यसंततिरसी
तिसोमेवापृथ्यास्तरणं।परिभोजनीयाद्धविषःपवित्रार्थंद्रोकुशावादा
यप्रादेशमात्रेमीत्वाअनसवेनच्छित्वाशमीनिधायादत्तइमोप्राणापना
वितिअमैथेनेसकृदङ्क्तेनुमार्ष्टि।पवित्रेस्थइति।ग्रंथिंकृत्वाउत्तरेगार्ह
पत्यमुपविश्यपरिकर्मिहस्तात्चमसमादायतस्मिन्नुदगग्रंपवित्रंनि
धायापआनयन्नाह।ब्रह्मन्नपःप्रणेष्यामियजमानवाङ्मेयच्छेत्फ
ल्गुकालेब्रह्माप्रसौतिदेवसवितःप्र ॥ णयेत्यथोआप्रस्कंदनाद्वोत्तं
यमोभवतिप्रणीतानामुसवनादिकेचिदिछंतिरश्मिपवित्राभिलिं
गान्नेत्यन्येलिंगंचादित्यरश्मिभिःशुद्धाइतिस्मरंतिवक्ष्यतिहोत्रप्र

णयेत्यक्तेसमंप्राणोधारयमाणोऽनिषिंचयन्स्कंदयन्नुत्यास्वस्थानेनिदधा
ति।अनयायःप्राणायानीतिपृथिवींमनसाध्यायेत्।दर्भैःप्रछाद्यप्रदक्षिण
मावृत्यप्रत्यङ्मुखःस्थादते।दक्षिणेनहस्तेनाग्निहोत्रहवणींसव्येनस्रुवंवेषा
यतेचेति।गार्हपत्येप्रतितपतिप्रत्यष्टमिति।अनसोभावात्यक्षेनोक्तं।
तदभावेगार्हपत्यस्यपश्चात्स्फ्यंनिधायस्फ्योपरिदारुपात्रीपात्र्यांध्रु
हीनोप्यस्रुवेणाग्निहोत्रहवणींनिधायतस्याऽउपरिपवित्रंकृत्वास्रुक्प्राणि
रेवपूर्वाईपात्र्याअग्निमुद्वासयतेधूरसीति।व्रीहीनवेक्षतेमित्रस्यत्वेति।
तृणंनिरस्यस्फ्रुवाताप्येति।चित्तिस्रुगितिदक्षाहोतारंजपित्वाहोत्पूर्व्य
मानेषुचतुर्होतृगतिथां।पंचहोतापशौषड्होताप्रायणीयायां।बर्हिष्य ९०

वमानोदक्षाहोतारंव्याचक्षीतेत्येवमादिषु।अग्रहःसग्रहोवाऽस्याहाकारःसस्वा
हाकारोवाएवंदक्षाहोतारंजपित्वायजमानमामंत्रयतेहविर्निर्वपिष्यामीति।निर्व
पत्यनुज्ञातेदेवस्यत्वेत्यपक्रम्याग्नयेजुष्टंनिर्वपामीतित्रिरेतेनयजुषानिर्वप
ति।सकृत्स्रुची।यच्छंतांपंचेति।यजुषामुष्टिंगृह्णंवाएवमेवानुपूर्व्यंहवींषि
निर्वपति।अग्नीषोमाभ्यामिंद्रायवेमधायेतिवैष्णवमास्यांऽअमावास्यायामाग्ने
यानंतरंऽइंद्राग्निभ्यामसान्नाय्ययाज्यानांऽइंद्रायेतिमहेंद्रायेतिवासान्नाय्य
याज्यानांयजमानोनिरूप्यमाणंहविरभिमुखोग्निहोतारमित्यक्त्वाप्रस्कंदना
त्पंचावत्तिनांनिर्वपणात्पंचावत्तंप्रक्रमेत्अवदानतःअध्वर्युर्निरुप्तानभि
मृशतिइदंदेवानामिति।क्षिप्तानभिमृशतिइदंमुञ्चसहेति।पात्रीगतान्व्रीहि
न्निरुप्तेषुप्रक्षिपतिस्कात्येत्येति।आहवनीयमीक्षतेसुवरभीति।गृहान्वी

क्षतेदृंहतमिति।एतावन्नूश्रुर्पेणसहादायोत्तिष्ठतिउर्वंतरिक्षमितिगमनमंत्रो
गार्हपत्यस्योत्तरतःसादयत्यदित्यास्त्वोपस्थइति।गार्हपत्यंनिरीक्षतेअग्नेहव्य
मिति॥इतिकेशवस्वामिकृतेप्रयोगसारेप्रथमेपंचमः॥ ॥अथेतस्यामितिं
एतस्यामेवेतिनिर्वापेकृतेअग्नीधितायांसश्रुकायामेवेत्यन्येषामाग्नेहोत्रिकव
ण्यमुदगग्रंपवित्रंनिधायतस्यामपभानीयोदगग्राभ्यांपवित्राभ्यांत्रिरु
सुनातिदेवोवःसवितोत्सुनात्विति प्रथमं।अच्छिद्रेणपवित्रेणेतिद्वितीयेव
सोःसूर्यस्यरश्मिभिरितितृतीयं।पक्षोविगृह्यमंत्रांतेत्रिरुसुनातिवा।अ
थेनाअपउन्मृज्यउच्चालयन्नादायोपोन्दिष्टत्यापोदेवीरितिस्रुगादा
यराड्स्रुक्कृस्वापएवप्रोक्षतिप्रोक्षितास्थप्रोक्षितास्थेतित्रिः।यत्रमंत्रेवी
प्सातत्रत्रिरेवमंत्रंब्रुवन्कर्मचत्रिरावर्त्तयेत्।यत्रसकृन्मंत्रंउत्क्रान्तिरुच

तेतत्रसकृदेवमंत्रंब्रुयात्।अथपुरोडाशीयान्व्रीहीन्प्रोक्षतिदेवस्यत्वेत्यनुष्टुप्या
येवोजुष्टंप्रोक्ष्याम्यग्नीषोमाभ्यामिंद्रायवेमधायेतियथादेवतंसकृन्मंत्रेणद्विस्त्रि
स्त्रीं।अग्नीषोमाभ्यांवोजुष्टंप्रोक्षामींद्रायवेमधायवोजुष्टंप्रोक्षामीतिवा।उत्ताना
नि पात्राणि कृत्वा प्रोक्षति।शुंधामितित्रिः।एकेनहस्तेनप्रोक्षणीर्धृत्वाऽपरेणो
त्तानानिकृत्वा प्रोक्षति।अन्येनोत्तानीकृतेवा।अतिशिष्टाःप्रोक्षणीर्गार्हपत्यस्य
पुरस्तान्निधायकृष्णाजिनंग्रीवायांगृहीत्वाऽदंडमपावृत्यावधुनोत्यनधूत
मिति।सकृन्मंत्रेणद्विस्त्रिस्त्रीं।अथैनत्पुरस्तात्प्राचीनग्रीवमुत्तरलोमोपस्तृणा
तिअदित्यास्त्वगसीति।अविसृजन्नेवैतानिकर्माणिकुर्यात्।कृष्णाजिनावधू
नना धास्तरणांतंऽउत्तरवत्प्रधूनाद्रिपुरोडाशीवपनांतं।एवमुत्तरवेलस्यावय
धानादाश्रपस्योपहरणात्।एवमधिवपनादाप्रस्कंदनात्।एवंकपालोपधाना

१ रा दापोंगाभ्यहॉभ्यां।एवंप्रस्तरआस्कवांसादनात्।एवमग्निर्यादानादस्वनना त्।ए
वमोदुंबर्याभिमर्शनात्।एवंयूपआपरिव्याणादिति।यथोपपादमेवैतानिकर्म
णिकुर्याद्वा।अविसर्गपक्षेसव्येनान्वारभणंदक्षिणस्यव्याप्तत्वात्।तस्मिन्नु
लूखलकृमध्यूहत्यधिषवणमुसीति।तस्मिन्नुलूखलेव्रीहीनावपत्यागतेस्तूर
५ नाव सीति।पंचावत्तिवापंचमुष्टीर्निर्वपेद्वा।मुसलमादायावदधात्यद्रिरसीतिकविछ
तंहविछदेहीतित्रिराकुर्यात।अध्वर्युःउच्चैःसमाहंतीतिब्रूयात्।आग्नीध्रःइष
उपलेदृषारवेणोच्चैःसमाहंतीतिवृषारवःपाषाणः।ग्राम्ययावा।इषमावदंतिसमा
हननं।सर्वेषांपात्राणां।दृषदुपलग्रहणंप्रदर्शनार्थं।यावंतोऽन्नात्व्यायद्वायुधा
नामुद्यउपश्रण्वंतितेसर्वेपराभवंतीतिदर्शनात्।द्विर्दृषदिसकृदुपलायां।ए
वंत्रिरावर्तयेत्।अध्वर्युरवहत्यउद्गतनूषान्कृत्वाऽन्तरतःश्रूर्पंनिदधाति।वर्षि

या दृढ्मसीति।श्रूर्पेपुरोडाशीनावंतिप्रातंर्वर्षदृढंवेत्विति।तूष्णींश्रूर्पंनिधायसम
स्तेनैवमंत्रेणास्मिन्पुरोडाशीयानुदृयेदृर्षदृढ्मसिप्रतित्वावर्षदृढंवेत्विति।वा॥
उदृढ्मपर्यावृत्यपरापुनातिपराक्कृतमिति।यांकांचिद्दिशंपर्यावृत्यवासव्येनहस्ते
नतुषान्गृहीत्वानैर्ऋत्यादिशिप्रक्षिपति।रक्षसांभागोसीति।रक्षसंबंधना
त्तस्यामेवापउपस्पृश्यश्रूर्पेणतंडुलांश्चव्रीहींश्चपृथक्करोति।वायुर्वेपूति॥
हविछनावावंविसृज्येति।यत्रमंत्रोक्तंतद्वैतंत्रावावंविसृजतितंडुलोदकेनन
यनांतेकुर्यात्।दृषदुपायांतंडुलान्प्रस्कंदयतिदेवोवःसवितोर्त।एतस्मिन्का
लेयजमानःकस्त्वायुनक्तिसत्यायुनक्तिमंत्रंब्रूयात्।अध्वर्युःसर्वानव
हंश्चैप्रयच्छन्नाहत्रिष्फलीकर्तनाइतिोअवहंत्रीतोनवहत्यत्रिष्फलीकृत्य
अध्वर्यवेब्रूयात्।त्रिष्फलीकृताइति।तान्दृषदुपायांप्रक्षिप्यप्रक्षाल्यांतर्वे

दिनिनयतिउत्करदेशेवा। त्रिष्फलीक्रियमाणानामिति। एतस्मिन्काले प्रातर्दोहं
धेनूर्योयहयत्यस्यविशेषः उदग्रेगेणापवित्रेण। आतंचनाग्निहोत्रोच्छेषणाव
त ज्यैसर्वंसायंदोहनवत्। अथप्रादोहमित्येवसिद्धेएतस्मिन्काळइतिब्रुवन्कालां
तरेप्यस्तीतिदर्शयति। ततश्चाग्निहोत्रमंतरेणातिसंमर्दनात्प्रागपिदोहइ
तिचशास्त्रोक्तत्वात्कथं। अथसायंदोहेतिपर्यवसितत्यानंतर्यंबोधयति। अ
हो ह्नादौपक्रमप्रभृतिअदोहसमाप्तेर्वाचंयमोभवति॥ इतिकेशवस्वामिकृते
प्रयोगसारेप्रथमेषष्ठः॥ ॥तंडुलप्रक्षालननिनयनानंतरंयोर्णास्यां। दो
हानंतरममावास्यायापूर्वकृत्साज्जिनमवधूयपूर्ववदास्तृणाति। तस्मिन्नू
दीचिनस्थूलप्रदेशेराध्यांनिदधाति। दिवस्कंभनिरसीति। राम्यायांप्राचीद्द १३
षदमध्यूहतिधिषणासिपर्वत्येतितस्याऊपरिउपलांनिदधातिधिषणासि

पार्वतेयीति। तस्यांपुरोडाशीयार्थान्तंडुलानधिवपतिदेवस्यत्वेत्यनुद्रुत्यामये
जुष्टमधिवपाम्याग्नीषोमाभ्यामिंद्रायवैष्णवायेतियथादेवतमधिवपति। अ
भिमृशत्यजयतिधान्यमसीति। ब्रह्माप्यधिवपनप्रभृतिकपालोपधानांतंवा चं
यमोभवति। अध्वर्युःप्रेषयति। प्राणायत्वेतिप्राचीअपानायत्वेतिप्रतिचीव्या
नायत्वेतितिर्यंची। बाहुमन्वीक्षतेदीर्घामनुप्रसितिमिति। प्राणायत्वेतिप्रतिचीं
अपानायत्वेतितिर्यंचीअथप्राचीप्रोहेत्दीर्घामनुप्रेधामितिवा। किंचिदपि
स्थूलसाज्जिनेप्रस्कंदयतिदेवोवःसवितेति। हविःप्रेष्येप्रयच्छन्नाहासंवपंतीपिं
षाएतन्निकृन्ततादितिअसंवपंतीयथानपतंतितथेत्यर्थः। पिषंतीतिबहुवच
नंपत्नीनियमार्थावार्थं। साहिगृहीत्वास्तृष्मपिष्टान्निष्करोतीत्यर्थः। चरुर
स्तिचेदधिवपनात्पूर्वमेवचरव्यम्बिभर्ति॥ ॥केशवस्वामिकृतेप्रथमेस
प्तमः॥ ॥अथैतानिकृष्णलानीति। एतानीतिसिद्धवदुद्देशात्सर्वाणिपात्रा

णिप्रक्षात्यसादयविनियोगान्तेतीतिगम्यतेसंख्योसाकृतंसोकार्योर्थंचेतत्।स
र्वत्रोपयोज्यद्रव्यातिप्राकृविनियोगात्संनिधाय्यनार्थएवमुत्सर्गः।कर्मणो
भवति।गार्हपत्यस्यपश्चात्कपालानिविभज्यसादयति।अग्नेदक्षिणतएका
दृग्नोत्तरतःस्वयमपिगार्हपत्यस्यपश्चादुपाविश्यधृष्टिमादत्तेधृष्टिरसीति।
सन्नयतोमावास्यायामुपवेषेणधृष्टिकार्यंकरोति।धृष्टिर्वाउपवेषइतिदर्श
नात्।गार्हपत्यमभिमंत्रयतेऽग्नेऽग्निमामहंजहीति।गार्हपत्यआज्याधिश्र
यणंपत्नीसंयाजवचनात्।श्रपणस्यानियमश्रुतेर्नियमार्थंगार्हपत्यग्र
हणं।गार्हपत्यादंगारमादायदक्षिणतोनिरस्यतिनिर्ऋत्यादाम्नृति।कपा
लोपधानोपदेशेअन्यमंगारमावर्त्तयत्यादेवयजंवहेति।तंदक्षिणेणकपा
लानांमध्यमुपदधातिध्रुवमसीतितस्योपर्यमेन्येगारंनिदधातिनिर्दग्ध

मितिमध्यमस्यपुरस्तादुपदधातिदृंहमसीतिमध्यमस्यपश्चादुपदधातिधरुण
मसीतिदक्षिणतोधर्त्रमसीतिदक्षिणास्यपुरस्तात्चितस्थेतिमध्यमस्यो
त्तरतोद्वेसंसृष्टेचितस्थेतिमंत्रावृत्तिश्चकपालामुनोपर्यंगारेरधिवासयति
गृणामितियोगमंत्रोच्चारणंकृत्वोध्वर्युर्यजमानोयानिधर्मेकपालानी
तिएवमेवोत्तरेणिकपालान्युपदधाति।आदेवयजंवहेत्यारभ्ययोगमंत्रां
तंअग्नीधनइत्यादिवदुवचनंकर्तृनियमार्थंकपालमुपरिष्टादग्नीध
ते।चरूणामधस्तादध्यस्यंतिश्रपणानि।श्रपयतेयेस्तानिश्रपणानिका
ष्ठानि।अध्यसनंप्रक्षेपःविष्टसंभवनीयाअपःकथयंति।अपइतिसामान्य
वचनात्।पूर्णपात्रमंतर्वेदिनिनयतीतिचांतेश्रवणात्अन्याइत्यपरे।प्र
णीताभ्यःस्रुवेणोपहत्यएवमदंतीभ्यइतिदर्शनात्।। ।।इतिकेशवस्वामि

कृतेप्रयोगसारेप्रथमेऽष्टमः॥ ॥तक्षायांविष्णोर्हव्यंवाचंयमोध्वर्युरुत्तरेण
गार्हपत्यमुपविश्यपवित्रेसव्येनधिष्ण्यस्यन्दर्गयंकृत्वादक्षिणेनहस्तेनस्रुग्गृ
ह्णात्यविष्टानिसंवपति।देवस्यत्वेत्यनुद्रुत्याग्नेयजुष्टंसंवपाम्यग्नीषोमाभ्या
मिंद्रायवेमधायेतियथादेवतं।यथासुश्रुततथाकरोति।ब्रह्मासंवापनम्र
भृतिनेदक्षिवासनांतंवाग्यमोक्षवति।सुश्रुतेपरिक्रामिणमाहोरात्रेआनये
ति।परिक्रमेपात्रमादायस्रुवेणोपहत्यपात्रेप्रक्षिप्येवंमदंतीष्वस्तस्मि
न्प्रक्षिप्यआनीयमानाज्यंरक्षुमंत्रयतेसमाषोड्रिरिति।अभिमंत्रिताज्य
पलक्षणंविष्टेष्वानीयक्षुमोविष्णोर्हव्यनीयंनिधायमदंतीभिःस्रावयतिअद्भ्यः
परीति।मेक्षणेनमिश्रयतिनत्वयेवेति।पृथक्कृत्याभिमृशतिअग्न
येत्वाअग्निषोमाभ्यांत्वाइंद्रायवेमधायत्वेतियथादेवतं।संसर्गान्वलुअ

भिमर्शयतेनवियोगोजायतेतेनसंसृज्यमानानिहवींषिअभिमृशेत्।नेकंहविः
समुत्यव्यूह्याभिमृशतीतिकेचिन्मोक्षणेनसर्वत्रनेकहविषयेनविभागमं
त्रोस्तीतिदर्शयति।पिंडंकरोतिमरुत्वस्यशिरोसीति।अश्वत्थफलमात्रमनुगंत
रंतोयस्येतितन्वंतंकूर्माकृतिंकृत्वादक्षिणेपाकपात्रानामँगोन्प्रत्यूह्यतेघृ
धिश्रयतिधर्मोसीति।कपालेघित्येवसिद्धेप्रत्यूह्यवचनंअर्थप्राप्तानामवि
रुद्धानामुपसंग्रहार्थं।सर्वेकपालेषुप्रथयत्यूरुप्रथस्वेति।सर्वाणिकपाला
न्यभिप्रथयतीब्रह्मणो।ब्रह्मणब्रह्मणंसंहितापारक्षद्वयोरेकार्थत्वार्थं प्र
।ततआज्यस्थाल्यामुदगग्रंपवित्रेनिधायाज्यंनिर्वपतिमहीनांपयोसीति
।गार्हपत्यस्योत्तरतोभस्मामिश्रानंगारान्निरूह्यतेघाज्यमधिश्रयति।उत्तरपु
रोडाशस्यपिंडकरणादिप्रथनांतंपूर्ववत्करोति।सान्नाय्येतूसीमधिश्र

यति। उपांशुपक्षेचरुपक्षेचरव्यास्रुवौनिर्वपन्याः। पिष्टोद्वपआनीयसोद
केनपाणिनाभिमृश्यश्लक्ष्णीकरोतिवेवंगृह्णीघ्वंगृह्णीतेत्रिः। वीसर्जा
यांउभयाहुतिः। अथोत्तरस्यसर्वाणिहवींषिसहपर्यग्निकरोति। अंतरि
क्षंदृंहतिसरुमंत्रेणाद्विमैत्रैस्तुसौ। अथदक्षिणंपुरोडाशंश्रपयतिदेवस्य
त्वाश्रपयात्विति। श्रपणमिहदर्भैरग्निज्वलनं। अविदंहंतःश्रपयतेत्युत्तर
त्रवचनात्। गार्हपत्यमग्निमंत्रयतेअग्नेहव्यमिति। एवमेवोत्तरंपुरोडाशंश्र
पयति। अथदक्षिणंपुरोडाशंभस्मनाग्निवास्यभस्माग्निवासनमवाहार्थं
वेदेनाग्निवासयतिसंब्रह्मणाप्रचस्वेतिअमंत्रेणाग्निंवासयतिवेदे
नाग्निवासनंसांगारेणभस्मनाशुद्धैरंगारैरग्निवासनेवेदविनाशात्अ
थोत्तरं। अविदंहंतःश्रपयतेतिपरिक्रमिणमुल्कावाचंविसृजते। पिष्टोद्व

पन्यांसंस्रावेनंगार्हपत्यादंगारेणाग्नितप्तंहृत्वांतर्वेदिअनूचीनाःप्रागाय
ताउदगायतावाप्रागपवर्गात्तिस्रोलेखाःकृत्वाप्रागग्रंप्रत्यपवर्गंनिनयवि२
ति। एकतायस्वाहेतिपुरस्तात्द्वितायस्वाहेतिमध्येत्रितायस्वाहेतिपश्चात्।
अथवेदमादत्ते। अयंवेदइति। वेदेनवेदिंत्रिःसंमार्ष्टि। वेदेनवेदिमिति। संमार्ग
श्चाचारादेवांतात्उदग्पवर्गः। वेदादानस्यवेदिकरणारंभत्वात्उत्तरानुवा
हदीवक्तव्यइवयंमहावेदेस्तंबयजुर्हरतीतिवेदोनप्रस्तरेनयंस्यादिति॥ दा था
॥इतिकेशवस्वामिकृतेप्रयोगसारेप्रथमेनवमः॥ ॥अथजघनेनवेद्यै न
र्निष्क्रामति। संमार्गानंतरंनिधायवेदांतिष्ठन्नित्युत्तरपदार्थानौतिष्ठनाक
र्त्तव्यत्वात्तेर्थानुवादउत्तरपदार्थानुरूपंसर्वत्रस्थानमासनंवानुष्ठेयमिति
ज्ञापनार्थं। महावेद्यांस्थित्वादानादिआसीनेनकर्तुमशक्यत्वान्निष्ठतेवक

प्रहरति पृथिविदेवयजनीति पथा बर्हिः छिनत्ति तथा प्रहरति स्फ्येन
१७ र्त्वग्निहोत्रहवणीकार्याभावादासीनएवस्फ्यमादत्ते देवस्यत्वेति आ
१८ दायाभिमन्त्रयते देवस्यबाहुरसीति अभिमन्त्रणंप्रधानत्वाद्दक्षिणेनधारणं
१९ एवंस्फ्यंसव्येनहस्तेनेकेनदर्भमुत्पाट्यतेनानिरस्यति गुणश्रुतत्वात्सव्येनसंम
२० र्जनंवायुरसीतिमृतेजाइति अन्यत्रवेदाःपूर्वोवर्हिर्वाद्वितीयस्मात्रेउदग्रंनिद
धातिपृथिव्यैत्वेत्यसीति ब्रह्मास्फ्यादानप्रभृतिवा वैष्णवत्याप्रोक्षणीनामा
सादनात्तस्मिन्दर्भस्फ्ये नैर्ऋतनदेशान्मृदमादत्तेअपहरूःपृथिव्याइति तो६
मृदंहरतिव्रजंगछेति आग्नीध्रउत्करदेशेउपविश्यउभाभ्यांपाणिभ्यांगृह्णा
ति अपिचगृह्णातीतिवचनात्एवमेवद्वितीयंहरति वेदिमवेक्षतेवर्षतु
तेपयोसीति हलोकरोमिनपतिबधानदेवसवितरिति आदानमंत्रएवविषे
षः द्वितीयेपृथिवीदेवयजनीति अदेवयजनइतितृतीयमनुवर्त्तयत्यरुक्षते
दिवंमारुक्षमिति नूत्सीचतुर्थंहरति सहबर्हिषा अथस्फ्येनपूर्ववत्परिग्राहं

परिगृह्णातिदक्षिणादंसादारभ्यदक्षिणायेश्रोण्यैवमस्त्वानेपरिगृह्णमिति रुद्रा
स्त्वेति दक्षिणायेश्रोणेरारभ्यअदित्यास्त्वेत्यूरुतरायेश्रोणेरारभ्यकरणंजपति
इमांनराःकृणुतेतिमंत्रकरणंमंत्रजपोदृष्टार्थोजपतीतिवचनात्प्रेषत्वेसंप्रे ति३
षमाहेत्यवक्षत्रउच्चैष्टुंचनप्रेषःतथाचसोमेकरणंजपतीत्यूक्त्वावेदिकरणो
वेदिकृत्ययतेतिवचनंयद्यंयंप्रेषोभविष्यन्तदनुनकंर्थस्यात्प्राचीवेदिंस्फ्ये
नोल्लुंतिदेवस्यसवितुःसवइति अथाग्नीध्रमाग्नीदितास्त्रिर्हरेति आग्नीध्रः हा६
पात्रेनवत्रिर्हरति अथसंप्रेषमाहब्रह्मन्नुत्तरमिति ततोब्रह्मोत्तरमाह
ष्टहस्पतेपरिगृहाणेतिपरिणेतितोत्तरंपरिग्राहंपूर्ववत्स्फ्येनकरोति ऋ
तमसीतिदक्षिणतः ऋतसदनमसीतिपश्चात् ऋतश्रीरसीत्युत्तरतःप्रा
गारभ्यस्फ्येनसंमीकरोति धाअसिस्वधाअसीतिपश्चिमतस्तीयभागेतिर
लि१ श्रीत्रेवांस्फ्येनारभ्यतस्यांमध्येतिर्यंचंस्फ्यंनिधायसंप्रेषमाहस्फ्यमस्यव

र्मनूसादयतीतिवसचनात्। प्रोक्षणीरासादयेतिप्रेषः। आग्नीध्रः प्रोक्षणीरासा
दयतिदक्षिणतोहवाऽध्वर्यवेददाति। सोऽदक्षिणेनहस्तेनगृहीत्वास्मयो
परिनिनीयस्मयस्यवर्मनूसादयति। ततउत्करेस्मयंनिहतियोमाहदेति। ह
स्तोप्रक्षात्यस्मयं। चप्रक्षालयतिउत्तरेणाहवनीयंप्रागग्रमिध्मावर्हिरुपसा
दयतिदक्षिणमिध्मंउत्तरंबर्हिः। उपसादनेवचनमनियमार्थं। दक्षिणंब
र्हिरुत्तरमिध्मंवा॥ ॥केशवस्वामिकृतेप्रथमेदृश्यम्॥ ॥अथेतास्रुच
इति। अथेतिउत्तरंसमंत्रकलात्इध्माधुपसादनानियमानिवृत्यर्थं। एता
इतिपात्रार्थत्वंदर्शयति। सव्यनिधिर्नुमोयादक्षिणानुवादः। दक्षिणस्था
चारतएवप्राप्तत्वात्। आग्नीध्रःप्रेषस्यकर्ता। आध्वर्यवेनादेशोवचना
द्येतरेःक्रियाःयावदुक्तंयथापत्न्यात्तेषामपितथैवतत्। आदत्ते। दक्षिण

हस्तेनस्रुवंध्रुवमुपभृतौ। सव्येनध्रुवांप्राशित्रहरणंवेदपरिवासनीनीति। गार्ह
पत्येप्रतितपतिप्रत्यष्टंरक्षःप्रत्यष्टाअरातयोग्नेर्दुतिवेदपरिवासना
निपंचधाविभज्यसंमृजेद्वासमस्तेरेववा। दक्षिणेनहस्तेनवेष्टयित्वास
न३व्येस्रुवंगृहीत्वासंमार्ष्टिगोष्टंमानिर्मृक्षमिति। अविशेषादंतरतोग्नेस्त्रिःप्रा
गपवर्गःसंमार्गस्त्रिर्बहिस्तूष्णीं। अत्रपात्रप्रत्यंचंगृहीत्वाप्रत्यगपवर्गःन्र
य५ क्षेदंधः प्रोंगारस्योपरिप्रागपवर्गः। सकृदेमंत्रजपः। प्राशित्रहरणस्य ५५
मंत्रेणतूष्णीवासमार्गः। अद्भिःसंमृज्यपुनर्निष्प्रान्यस्मैप्रयच्छतिजुहू
वाचंप्राणमितिस्रुववत्। उपभृतंचक्षुःश्रोत्रमितिध्रुववत्। ध्रुवांप्रजां
त्र२ योनिमितिपूर्ववत्। प्राशित्रहरणंरूपंवर्णमिति। स्रुक्कुसमोनान्यद्भिःसंस्प ५७
ृश्यगार्हपत्येनुप्रहरतिदिवःपृथिव्यामितिअथनाअसंचरउत्करेवानिर

स्येद्दर्शपूर्णमासयोरहारः विकृतौ न्निरासनमितिकेचिदाहुः। एवमिध्मसन्नहना
न्यपि उत्करस्यपुरस्ताद्दर्भान्संस्तीर्यतेषुस्रुचःसादयित्वापनीतंतरेणवेद्यंकरोप्र
पाद्यगार्हपत्यस्यदक्षिणापश्चिमदेशेऽधोजानुंउदङ्मुखीमुपवेशयत्योक्षणसन्नह्यति
।आशासामासोऽयुक्तंक्रियातान्ते। बहुपत्नीकविषयेएकेकामेवासांसन्नह्येदेके
कांगार्हपत्यमीक्षयेदेकेकांमाज्यमवेक्षयेत्। सकृदेवैताःसंन्नह्येकांगार्हपत्यमी
क्षयेदेकेकामाज्यमवेक्षयेद्वा। ग्रंथिकरणेअवाचीनपाद्रामूर्ध्वंनिर्मोचनंग्रंथिं
करोति। अथवाऽधूर्ध्वपाद्रामवाचीनंनिर्मोचनंवा। पत्न्यामविद्यमानायांयज
मानायतनआसीनोयजमानएवैतान्मंत्रान्निगदेत्पत्नीसंयाजकाःस्रुत्वे
तेमंत्राःदृष्टार्थाभवंति। तस्यामविद्यमानायांनेवतानाड्येद्वा। आचमनंप्र १९
तसन्निधानेच। यजमानबर्हिषत्यैतस्यपश्चात्सुप्रजसस्त्वेत्यपविशति।
उनेतिरिक्तमितिच। अथैनांगार्हपत्यमीक्षयति। अग्नेरुरुपतइति। तामाज्यम

वेक्षयतिमहीनांपयोसीति। पत्न्यवेक्षितमाज्यंगार्हपत्येधिश्रयतितेजोसीति। सम्मि
धमधस्ताद्धारयत्याकूरतितेजोनुप्रेहीति। अथैनदाहवनीयेधिश्रयतिअग्नितस्ते नि३
तेजइतिआहवनीयेसमिधमाधायवेददक्षिणार्धेस्फ्यस्यवर्मनिधायाज्यैध
र्यंयजमानमाज्यमवेक्षयतिआज्यमसीति। मंत्रांतेपूर्वंनिमील्यपश्चादवेक्ष
ते। यजमानःयथाहृतंपुनराहृत्योत्तरार्धेवेद्यैर्वर्म्मन्येवनिधायाध्वर्युरवेक्ष
तेअग्नेर्जिह्वासीति। अत्राध्वर्युग्रहणंकृतःप्राक्संमार्गादस्यान्यःकर्त्ता
इति। यदिसएवस्यात्यथापूर्वमध्वर्युग्रहणंनकृतंतथेहापिकर्त्तव्यंस्यात्।
उदग्ग्राभ्यांपवित्राभ्यांपुनराहरंत्रिरुत्पुनाति। आहृत्याहृत्यपुनराहारं
आत्मनःसकाशादारभ्यपुरस्तान्नीत्वाशुक्रमसीतिप्रथममनूद्यैवात्मा
नंप्रत्याकर्षति। एवंततोद्वैःपुनराहृत्याहृत्योत्पुनाति। ज्योतिरसीतिद्वितीं

यं ते जोसीति तृतीयं पवित्राभ्यां पूर्ववत्प्रोक्षणीरुत्पूयतस्मिन्पवित्रेआधायादत्ते।
दक्षिणेनहस्तेनस्रुवंसव्येनजुहूंवेदेप्रतिष्ठाप्यतस्यामाज्यंगृह्णाति। ब्रह्माआज्यग्र
हणाप्रभृतिवाचंयमोभवत्यास्रुचोसादनात्। शुक्रंत्वाशुक्रायामित्येतेनयजु
षाचतुर्गृहीतंआज्यंयजमानोनुमंत्रयते। पंचानांत्वावातानांददे। अध्वर्युः
संस्रवोत्तरतोन्यस्यहस्तेप्रयच्छति। दक्षिणतोयजमानस्यहस्तेवा। अथो
पशुतिगृह्णाति। ज्योतिस्त्वाज्योतिषीतिएतेनयजुषाऽष्टगृहीतंगृहीत्वाऽष्टगृ
हीष्यन्कनीयाज्यंगृह्णीयात्। गृहीतेगृहीतयजमानोनुमंत्रयते। चरोस्त्वा
३ पवित्रस्येत्यादिब्रह्मवर्चसायेत्यंतं। तत्संसृज्यप्रयच्छति। ततोध्वर्युर्गृह्णा
ये तेअर्चिस्तेतेनयजुषाचतुर्गृहीतंगृहीत्वापत्नीसंपूरायित्वागृहीतंगृही २०
तंयमानोनुमंत्रयतेभ्रस्माकामित्यादिकामायेत्यंतं। नयाजमानेर्यजमा

नोमंत्रयेद्वा। अध्वर्युरुभयेमंत्रैर्गृह्णीयात्। पोरोडाशिकैर्यजमानेश्च। याज्ञैर्य
जमानोनुमंत्रयते। आधिपूर्यमाग्नीध्रोवानुमंत्रयतेकामायत्वेति॥ इतिप्र
थमेएकादशः॥ ॥अथैतामितिहृतार्थीआज्यस्थालीसस्रुवांवेदाःपश्चा
न्निधायपूर्ववत्प्रोक्षणीरुन्मृहयन्नुपोत्तिष्ठतिआपोदेवीस्तिः। पूर्ववदाद्रेरेवा
पःप्रोक्ष्येध्मंविस्रस्यप्रोक्षति। रूप्सोस्यारारेष्ठइतिइध्मबर्हिषोःप्रोक्षणंत्रि
स्त्रिरेकैकंप्रोक्षेत्सकृत्सकृत्वा। वेदिंप्रोक्षतिवेदिरसीति। बर्हिरसीतिबर्हिः
प्रोक्षति। बर्हिरिध्मप्रणीतयोर्मध्येनप्राक्नीत्वाप्रणीताहवनीययोर्मध्येनपु
नराहृत्यवेधांपुरोधग्रंथिमासाद्यप्रोक्षतितिष्ठन्नेवाग्रमध्यमूलानिति
ष्ठन्प्रङ्आसीनइतिपक्षांतराद्विकृत्यः। दिवेवेग्रंथिप्रत्यग्राण्यंतरिक्षाय
त्वेतिमध्यानिपृथिव्यैत्वेतिमूलानिसहस्रुचापुरस्तात्प्राक्ग्रंथिप्रत्यक्सस

दस्कवास्कसहितेनपाणिनाप्रत्यंचंप्रत्यङ्मुख्यास्रुचाबर्हिषाग्नींधंप्रोक्षति।त्रि
रुप्रोक्षणीर्निनयेदितिदक्षिणायेश्रोणेरुत्तरायेश्रोणेःस्वधापितस्यइति।प्रो
क्षणीर्निनयेत्।प्राचीनावीतंकेचिदृक्षंतित्वत्सबोधत्वात्।प्राचीनावीतीपि
त्र्याणीतिवचनात्। नैतदेवंस्वाध्यायब्राह्मणेतस्माद्यज्ञोपवीत्येवाधीयीत
याजयेद्यजेतवेतिवचनात्।दर्शपूर्णमासयोरुपवीत्येतइतिपुनर्वचनात्।
अग्निहोत्रेदक्षिणतःप्राचीनावीतीवैदर्शपूर्णमासयोस्त्वापितऋत्विग्भ्येति प्राची
नावीतयज्ञकर्णात्।इतिवचनाच्च।प्राचीनावीतिदर्शपूर्णमासमंत्रेतद्विका त्रं ४
रेषुवचनादृतेनकर्तव्यं।प्रोक्षणीध्यानेनिरस्यबर्हिर्विस्रस्यप्रथमंप्रस्तरं २१
गृह्णातिविस्रोस्तूपोसीतितस्मिन्यत्रेअपिस्रजतियजमानेप्राणापानौ
दधामीतिवातूष्णींवाब्रह्मणेवायजमानायवाप्रदायबर्हिःसन्नहनाभि

दक्षिणायेश्रोणेरुत्तरादंसान्निदधातिबर्हिःसन्नहनानीतिवचनान्नि
धानंविस्रस्येतिगम्यते।इतरथाएकस्मिन्वचनंनस्यात्।भ्रुत्वांवेस्र
स्यदक्षिणावेचंतेस्तृणीयाद्वा।दक्षिणाद्वेदंसादास्यबर्हिर्मुष्टीस्तृणा
तिदेवबर्हिरितिप्रतिमुष्टिमंत्रावृत्तिःवचनंमुष्टिनापुरस्तात्सुत्र त्रं ४
च्छिन्नांदक्षिणाद्वेदंसादोत्तराद्वेदंसात्।एवंमध्यंएवंपश्चात्।प्रागग्रैःअ
नतिदीर्घंबर्हिरितीयथाबर्हिर्नदृश्यतेतथास्तृणाति।एनांप्राचींधातु
त्रःस्तृणीयाद्वा।ब्रह्मणोहस्तात्प्रस्तरंगृहीत्वाप्रस्तरपाणिःप्रागग्निस्र

हस्तवास्तकसहितेनपाणिनाप्रत्यंचंप्रत्यङ्मुख्यास्रुचाबर्हिषाग्रंधिप्रोक्षति।त्रि
रुप्रोक्षणीर्निनयेद्दक्षिणायेश्रोणोरुत्तरायेश्रोणेःस्वधापितृभ्यइति।प्रो
क्षणीर्निनयेत्।प्राचीनावीतंकेचिदिच्छंतिपितृसंबंधित्वात्।प्राचीनावीतीपि
त्र्याणीतिवचनात्।नैतदेवंस्वाध्यायब्राह्मणेतस्माद्यज्ञोपवीत्येवाधीयीत
याजयेद्यजेतवेतिवचनाद्दर्शपूर्णमासयोरुपक्रमेयतइतिपुनर्वचनात्।
अग्निहोत्रेदक्षिणतःप्राचीनावीतीवैदर्शपूर्णमासयोःपितृभ्यस्त्वापितृमन्तमिति प्राची
